तस्य भेदाः पञ्च यथाह तत्रैव "उद्घात्यकः कथोद्घातः प्रयोगातिशयस्तथा। प्रवर्त्तकावलगिते पञ्च प्रस्तावनाभिदाः। तत्र। पदान्यन्यगतार्थानि तदर्थगतये नराः। योजयन्ति पदैरन्यैः स उद्घात्यक उच्यते१। यथा मुद्राराक्षसे सूत्र०। "क्रूरग्रहः सकेतुश्चन्द्रमसं पूर्णमण्डलमिदानीम्। अभिभवितुमिच्छति बलात्"। अनन्तरं नेपथ्ये आःक एष मयि जीवति सति चन्द्रगुप्तमभिभवितुमिच्छति। अत्रान्यार्थवन्त्यपि पदानि हृदिस्थार्थावगत्या अर्थान्तरे संगमय्य पात्रप्रवेशः। सूत्रधारस्य वाक्यं वा समादायार्थमस्य वा। भवेत् पात्रप्रवेशश्चेत् कथोद्घातः स उच्यते२। वाक्यं यथा रत्नावल्याम्। "द्वीपादन्यस्मादपि घटयति विधिरभिमुखीभूतः" इत्यादि। सूत्रधारेण पठिते नेपथ्ये एवमेतत् कः सन्देहः द्वीपादन्यस्मादपीत्यादि पठित्वा यौगन्धरायणस्य प्रवेशः। वाक्यार्थं यथा वेण्याम्। "निर्वाणवैरदहनाः प्रशमादरीणां नन्दन्तु पाण्डुतनयाः सह माधवेन। रक्तप्रसाधितभुवः क्षतविग्रहाश्च स्वस्था भवन्तु कुरुराजसुताः सभृत्याः" इति सूत्रधारेण पठितस्य वाक्यस्यार्थं गृहीत्वा नेपथ्ये। आः दुरात्मन्! वृथामङ्गलपाठक! कथं "स्वस्था भवन्तु मयि जीवति धार्त्तराष्ट्राः। ततः सूत्रधारोनिष्क्रान्तः भीमसेनस्य प्रवेशः। यदि प्रयोगएकस्मिन् प्रयोगोऽन्यः प्रयुज्यते। तेन पात्रप्रवेशश्चेत् प्रयोगातिशयस्तदा ३। यथा कुन्दमालायाम्। नेपथ्ये "इतइतोऽवतरत्वार्या" सूत्र० कोऽयं खलु आर्य्याह्वानेन साहायकं मे सम्पादयति विलोक्य कष्टमतिकरुणं वर्त्तते। "लङ्केश्वरस्य भवने सुचिरं स्थितेति रामेण लोकपरिवादभयाकुलेन। निर्वासितां जनपदादपि गर्भगुर्व्वीं सीतां वनाय परिकर्षति लक्ष्मणोऽयम्"। अत्र नृत्यप्रयोगार्थं स्वभार्य्याह्वानमिच्छता सूत्रधारेण "सीतां वनाय परिकर्षति लक्ष्मणोऽयमिति" सीतालक्ष्मणयोः प्रवेशं सूचयित्वा निष्क्रान्तेन स्वप्रयोगमतिशयानएव प्रयोगः प्रयोजितः। कालं प्रवृत्तमाश्रित्य सूत्रधृक् यत्र वर्णयेत्। तदाश्रयस्य पात्रस्य प्रवेशस्तत्प्रवर्त्तकम् ४। यथा "आसादितप्रकटनिर्मलचन्द्रहासः प्राप्तःशरत्समय एष विशुद्धकान्तः। उत्खाय गाढतमसं घनकालमुग्रं रामोदशास्यमिव सम्भृतबन्धुजीवः"। ततः प्रविशति यथा निर्दिष्टोरामः। यत्रैकत्र समावेशात् कार्य्यमन्यत्प्रसाध्यते। प्रयोगे खलु तज्ज्ञेयं नाम्नावलगितं बुधैः५। यथा शाकुन्तले। सूत्र० नटींप्रति "तवास्मि गीतिरागेण हारिणा प्रसभं हृतः। एष राजेव दुष्मन्तः शारङ्गेणातिरंहसा"। ततोराज्ञः प्रवेशः। योज्यान्यत्र यथालाभं वीथ्यङ्गानीतराण्यपि। अत्र आमुखे उद्घात्यकावलगितयोरितराणि वीथ्यङ्गानि वक्ष्यमाणानि। नखकुट्टस्तु "नेपथ्योक्तं श्रुतं यत्र त्वाकाशवचनं तथा। समाश्रित्यापि कर्त्तव्यमामुखं नाटकादिषु"। एषामामुखभेदानामेकं कञ्चित्प्रयोजयेत्। तेनार्थमथ पात्रं वा समाक्षिप्यैव सूत्रधृक्। प्रस्तावनान्ते निर्गच्छेत्ततोवस्तु प्रयोजयेत्। तत्र पूर्व्वं पूर्व्वरङ्गः सभाचनमतः परम्। कथनं कविसंज्ञादेर्नाटकस्याभिधा ततः। रङ्गं प्रसाद्य मधुरैः श्लोकैः काव्यार्थसूचकैः। रूपकस्य कवेराख्यां गोत्राद्यपि च कीर्त्तयेत्। ऋतुञ्च कञ्चित्प्रायेण भारतीं वृत्तिमाश्रितः। तस्याः प्ररोचना वीथी"।

**आमुप** पु० आमे पीड़ायै उप्यते वप–घञर्थे क। (वेडवास वंशभेदे। [ ऋ० ४,३१,९।

**आमुर** त्रि० आ+मुर्व्व–क्विप्। हिंसके। "राधोवरन्त आमुरः"

**आमुष्मिक** त्रि० अमुष्मिन् परलोके भवः ठञ् सप्तम्याः अलुक् टिलोपः। परलोकभवे "कुर्य्यादामुष्मिकं श्रेयः" मनुः। स्त्रियां ङीप्। "नैवालोच्य गरीयसीरपि चिरादामुष्मिकीर्य्यातनाः" शा०द०।

**आमुष्यकुलक** न० अमुष्यकुलस्य भावः मनोज्ञा० वुञ् अलुक्। प्रशस्तकुलत्वे "आमुष्यायणामुष्यपुत्रिकामुष्यकुलिका" इति वार्त्तिकोक्तेः अस्य स्त्रीत्वमपि।

**आमुष्यकुलीन** त्रि० अमुष्यकुले साधुः प्रतिज० खञ् तदृगणपाठात् षष्ठ्या अलुक्। अमुष्यकुले साधौ।

**आमुष्यपुत्रिका** स्त्री अमुष्य पुत्रस्य भावः मनोज्ञा० वुञ् अलुक्। अमुष्यपुत्रस्य भावे। आमुष्यकुलकशब्दे प्रदर्शितवार्त्तिकात् स्त्रीत्वम्।

**आमुष्यायण** न० अमुष्य ख्यातस्यापत्यम् नड़ा० फक् अलुक्। प्रख्यातवंशोद्भवे "आमुष्यायणोवै त्वमसि" श्रुतिः।

**आमृष्ट** त्रि० आ+मृष–क्त। १आधर्षिते २मर्दिते च "आमृष्टास्तिलकरुचः स्रजोनिरस्ताः" माघः। आ+मृज–क्त। ३परिमार्जिते ४विशोधिते च। आ+मृश–क्त ५संस्पृष्टे च

**आमोक** पु० आ+मुच–घञ्। परिधाने। ल्युट्। आमोचनमप्यत्र न०।

**आमोद** पु० आमोदयति आ+मुद–णिच्–अच्। १अतिदूरगे गन्धे "आमोदमुपजिघ्रन्तौ स्वनिश्वासानुकारिणौ" रघुः "आमोदकर्म्मव्यतिहारमीयुः" माघः। उत्तमस्त्रीणां २मुखनिश्वासादिगन्धे च। "मुखामोदं मदिरया कृतानु-